No. १४ क-२

Title त्रिकूटापञ्चाङ्गम्

Author

Extent १८ पत्र Age

Subject तन्त्र

E-18

श्री. ॐश्रीदेवीजयत्यमला श्रीदेव्युवाच भगवन्सर्ववेत्तास्त्वंज
१ गतामुपकारकः देवादिदेवदेवेश त्रैलोक्याभयदायक प्रा
क्तरास्तारसंग्राममे मह्यं दत्तो वरस्त्वया तदद्य कृपया शंभो सं
प्रदातव्यमो भव श्रीभैरव उवाच देवि सत्यं वरो दत्तो देवदा
नवसंगरे यत्ते मनस्यभीष्टं तत्तत्सर्वं वदस्व सुव्रते श्रीदेव्युवाच
भगवन्सर्वधर्मज्ञ सकलागमपारग देवदेवी महादेवी म
हात्रिपुरसुंदरी त्रिकूटा षोडशी देवी श्रीविद्या ब्रह्मरूपिणी

तस्याः पंचांगमखिलं सारात्सारोत्तमोत्तमं वद शीघ्रं म
हादेव यद्यहं प्रेयसी तव श्रीईश्वर उवाच लक्षवारं मह
ह्वाणि वारितासि पुनः पुनः देवदेवि महादेवि पुनस्त्वं परि
पृच्छसि श्रद्धयाहं कृपया देवि तव प्रीत्या महेश्वरि महात्रि
पुरसुन्दर्याः पंचांगं तं ब्रवीम्यहं श्रीविद्या त्रिपुरा देवी जग
च्चैतन्यरूपिणी त्रिकूटा षोडशी विद्या महाश्रीषोडशाक्ष
री या देवदेवी जगतां सृष्टिस्थितिलयात्मिका सा महाषो

श्री· डशीविद्यामहात्रिपुरसुंदरी राज्यंदेयंशिरोदेयंदेयासं
२ पत्मदार्थिने वक्त्रपूर्णगृहंदेयंनदेयाषोडशाक्षरी गो
प्यागोप्यतमांविद्यांगुप्तांचशारजन्मनः तस्मातिगोप्यं
गोप्तव्यंसाधकाग्रेनगोपयेत् त्रिपुरेशीमहाविद्याप्रभा
वसहिताकलौ अवस्थारूपिणीविद्याबालायुवतिप्रौ
ढिका सुन्दरीत्रिपुराबालाप्रौढापंचदशाक्षरी देवीवि
कूटाश्रीविद्यामहाश्रीषोडशाक्षरी महाश्रीषोडशाक्षर्या :

मंत्रोद्धारंब्रवीम्यहं शिवःशक्तिःकामक्षितीमायाहरःस्व
धातवः कामोहंसःशक्रलज्जेनदन्त्रचन्द्रमास्मरः इंद्रो
धरेन्द्रजास्येषापूर्णापंचदशीरिता गुरुप्रसादसंलभ्याश्री
विद्याषोडशाक्षरी अस्यश्रीषोडशाक्षर्योःअन्यदोषोनवि
द्यते मंत्रोत्कीलनदोषोवामंत्रसंजीवनस्यच संपुटस्यविना
देविपुरश्चरणकर्मणा गुरुहस्तेनवादेविसाधकस्यक
रेणवा पुरश्चर्याप्रकुर्वीतवर्णलक्षंजपावधिं नकदावि

श्री॰ त्कुर्वीत स्वहस्तेन च साधकः न तिथिर्न च नक्षत्रं नां
३ गन्यासस्य मंत्रिणां न वारदोषो नो विघ्नो न शौचं नियम
मो न च सा प्तादस्त न रूपोयं मंत्रः श्रीषोडशाक्षरः ऋषिः
स्यादक्षिणामूर्त्तिः पंक्तिःछंद उदाहृतं देवता च मया प्रो
क्ता महात्रिपुरसुंदरी लक्ष्मीबीजं पराशक्तिः कामराज
स्तु कीलकं चतुर्वर्गस्तु विद्यायां विनियोगः प्रकीर्त्तितः
यंत्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकं सर्वसंमोहनं यं

त्रं सर्वसिद्धिप्रदायकं अथ यंत्रोद्धारः बिंदु त्रिकोणवसु
कोणदशारयुग्ममन्वश्रनागदलसंगतषोडशारं वृ
त्तत्रयंचधरणीसदनत्रयंचश्रीचक्रराजउदितःपरदेव
तायाः अथ ध्यानं प्रवक्ष्यामि सर्वतंत्रेषु गोपितं सारं वि
श्वरहृदयाः सर्वस्वं मम पार्वति येन ध्यानेन ब्रह्मांडं कटा
ह्नांतं विलीयते ऐं उन्नमहेमरुचिरां रविचंद्रवह्निः नेत्रां य
नुःशरयुतांकुशाकामपाशान् रम्यैः भुजैश्च दधतीं शिव

श्री॰ शक्तिरूपांकामेश्वरींहृदिभजामिष्टतेंडलेवां इतिध्या
४ तं अनेनध्यानमात्रेणब्रह्माविष्णुर्हरःशिवे ब्रह्माद
यःसुरगणा जातानिःसंदेहचवल्लभः अथातोदेविवक्ष्यामि
पूजापटलमीश्वरि श्रीदेव्याःषोडशार्णायाःपूजांमान
सिकींचरेत् मृतकेसूतकेवापिपथिकांतारमंडलेम
नसैवचरेत्पूजां त्रिकूटायाःमहेश्वरि सृणुत्वंभक्ति
भावेनयथावद्धार्पयतेमया अध्यायशायनाद्देविब्रा्ह्म

दिव्येमुहूर्त्तेकेप्रक्षाल्यमुखहस्तांघ्रीनाचम्यत्रिःमहेश्व
रि प्राणायामत्रयंकृत्वागुरुंध्यात्वासशक्तिकं देवीकामे
श्वरांकोपविष्टांकामेश्वरींस्मरेत् ध्यात्वापूर्वेणषड्दीर्घैः
न्यासंकृत्वायथाविधि जपेन्मूलंचगायत्रींगुरवेचसम
र्पयेत् आगत्यवहिर्ह्रींकारंजपन्नारायणम्भमिश तत्रमू
त्रादिंसंत्यज्यवर्णोक्तंशौचमाचरेत् रमावीजेनसंशो
ध्यदंतान्स्नायकसन्नमः मायावीजेनगंडूषत्रयंकुर्यान्म

श्री॰ हेश्वरि मूलेनदेवितीर्थानितदावाहयस्वसिद्धये ॐ
५ गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावे
रिजलेस्मिन्सन्निधिंकुरु इत्यावाह्यमहादेविदेवीमा
वाहयेत्ततः मूलेनत्रिःसमुत्सृज्यनद्यंभसिमहेश्वरि
ततोमूलंजपेन्मंत्रीगायत्रींचविशेषतः सूर्यायार्घ्य
त्रयंदद्याद्देवदेव्यास्तथैवच ॐत्रिपुरेदेविविद्महेक्रो
दिकूटसमन्विते कामेश्वरिधीमहिचद्वितीयकूटम्

षिते तृतीयहस्तपूर्वं च ततः क्रियाप्रचोदयात् ३ जलादा
कृत्यवासांसि परिधाय च साधकः संध्यां तु मनसा कृत्वा चा
घमर्षणपूर्वकं संध्यां निर्वर्त्य देवेशि यागगेहं ततो व्रजेत् त
तः द्वारार्चनं कृत्वा कुर्यादासनशोधनं भूतशुद्धिं ततः कुर्या
त्प्राणार्पणविधिं ततः षोडशन्यासभागेन देहं देवमयं स्म
रेत् मनसा वर्णभागोक्तं श्रीचक्रं तत्र भावयेत् विभाव्य तत्र
श्रीचक्रं हृदये साधकोत्तमः योगपीठं ततोऽभ्यर्च्य हृदंतरे

श्री· लंवं इति विंदौ कामेश्वरं कोपविष्टां कामेश्वरीं स्मरेत् पा
६ त्राणि स्थापयेत्तत्र त्रिकोणे जलनिर्मिते चतुरस्रं मंडले
च विधाय गंधकांबुभिः सामान्यार्घ्यं त्रिकूटाया मंडले पूजये
द्विवे चतुरश्रे मंडले च समभ्यर्च्य चरेत्ततः ॐ अस्त्राय फडि
त्येवं संस्थाप्याधारत्रिपादिकां तत्रास्त्रक्षालितं शंखं समभ्यर्च्य
तथास्त्रधीः तत्रार्कमंडलं देवि सोमवह्न्योश्च मंडले संपूज्य
मूलमंत्रेण कलास्तेषां समर्चयेत् मूलाष्टमंत्रितं देवि वि

धायतीर्थवारिच तेनार्घ्यंशिवेशंखंशंखमन्त्रेणाभि
वेद्यच तीर्थमावाह्यदेवेशिरस्थंतत्रैवभावयेत्
सामान्यार्घ्यस्यवामेतुशोधितंकलशंशिवे अस्त्रेचै
वषट्श्रंचवृत्तंतर्याश्रमंडले शुष्यात्ततःसमभ्यर्च्य
तत्रकूटत्रयेणाच षडंगन्यासभागेनसमभ्यर्च्यष
डश्रकम् चतुरश्रंतथाभ्यर्च्यसंस्थाप्यात्रत्रिपादि
कां कलाःसूर्येंदुवह्नीनांसमभ्यर्च्ययथाविधि क

६ श्री. लशेस्मिन्महादेविदेवींसंपूजयेत्परां आनंदभैरवं
चैवदेविकूटत्रयेणच मायारमाकामबीजैःयेत्
मुद्रांप्रदर्शयेत् मत्स्यमुद्रादिनाच्छाद्यसामान्यार्घ्य
स्यदक्षिणे कलाशार्द्धमंडलेचविधायान्यमहेश्वरि
शक्तिपात्रंसमादायमूलेनाष्टाभिमंत्रितं तत्रैवब्राह्म
णीपात्रंतथाबटुकपात्रकं गुरुपात्रादिकंदेयंतीर्थ
शेषादयोप्ययः पंक्त्याकारेणदेवेशिपात्राणिस्थापये

ततः पाद्यार्घ्यमधुपर्काचमनीयपात्रपूजनं विधाय
तत्रश्रीदेव्यान्यासं षडंगपूर्वकं मणिपूरेब्रह्मरंध्रेमू
लाधारादिके शिवे शिवशक्त्योः सामरस्यं विभाव्यसा
धकेश्वरः ततः कामकलारूपत्रिपुरीकृतविग्रहः
शिवशक्त्योः पादुकां च तर्पयामिनम इति सप्तधा देवि
संतर्प्य ततः कूटत्रयेण च सर्वज्ञताद्यङ्गशक्त्याद्याः पू
जनीयाश्च तर्पणैः संतर्पयेद्गुरुं तत्र दिव्यौघादीन्महे

श्री· श्वरि पराशक्तियुताःपूज्याःतीर्थैर्वांतामहेश्वरि

८ तत्त्वत्रयेणवाचम्यशिवपदमवेत्स्वयं श्रीचक्रदेवेदे

8 व्योमरूपंध्यात्वात्रिवर्णाकं स्थापनंसन्निधानंचसं

मुखीकरणंशिवे मुद्राभिःसाधकःकृत्वादेवींस्पृष्ट्वा

यमुद्रया वेष्टदेवायमूलेनप्राणान्दत्वामहेश्वरि

शिवशक्त्योःपरंरूपंध्यात्वापूजांसमाचरेत् तत्रादौदे

वदेव्योर्घ्यपाद्याचम्यादीन्निवेदयेत् मधुपर्कंनिवेद्यापि

नैवेद्याचमनीयकं नानालंकारवस्त्राणिनिवेद्यमाथ
कोन्नमः नैवेद्याचमनीयाद्यंशिवशक्त्योःनिवेदयेत् ।
दीपधूपादिसंभाव्यपरमान्नंनिवेद्यच तांबूलंचसमावे
दयित्वाहृच्छक्त्यायाश्चतर्पयेत् पुष्पांजलिंचश्रीचक्रेद
त्वापूजांसमारभेत् आदौकामेश्वरीनित्यांपूजयेद्भगमा
लिनीम् नित्यक्लिन्नांचसंपूज्यभीरुंडांचमहेश्वरि
श्रीवह्निवासिनींनित्यांमहाविद्येश्वरीततः शिवदूतीं

श्री॰ ९

महेशानित्वरितांपूजयेत्ततः श्रीकुलसुंदरीनित्यां
नित्यानित्यांततःपरं ततोनीलपताकांचविजयां
चमहेश्वरि श्रीसर्वमंगलांनित्यांज्वालामालांत
तःपरं चित्रांनित्यांमहेशानित्रिकूटांपूजयेच्छिवे
ततःपुष्पांजलिंदत्वाश्रीविद्याष्टभागके गुरुपं
क्तित्रयींपूज्यातर्पणीयाष्टष्यकष्टष्यक गुरुपूजांवि
धायाथत्रिपुरांपूजयेत्ततः त्रिपुरांपूजयाम्यघतर्पयामि

नमइति तन्नादौ पूजयेद्देवि ऐं क्लीं सौः त्रिपुरेश्वरी त्रिपुर

सुंदरीं देवि ततः त्रिपुरवासिनीम त्रिपुरां पूजयेत्मंत्री

ऐं क्लीं त्रिपुरमालिनीं ह्रीं श्रीं सौः त्रिपुरां सिद्धां पूजयेत्

त्रिपुरां विकां पूजयेत्मां त्रिकोमं त्रैर्महा त्रिपुरसुंदरी ३

तिश्री चतुरस्राद्दिवेन्द्वांतेषु पूजयेत् नवचक्रेषु देवे

शि नवचक्रेश्वरीं ततः पूजनीयाश्च योगिन्यो वामाव

र्तेन पार्वति अणिमाद्यास्तथा सिद्धीः पूजयेत्साधको

श्री· नमः ब्राह्म्याद्यामातरः पूज्यादेवास्तु परमेश्वरि सर्वसं
९ क्षोभिणीत्याद्यानवमुद्राः प्रपूजयेत् ततोमूलेनश्री
10 विद्यांसंतर्प्यपरमेश्वरी पुष्पांजलिंचश्रीचक्रेदत्वास्य
दलेर्चयेत् सर्वाशापूरकाद्यान्श्रीचक्राद्यमहेश्वरि
दद्यात्पुष्पांजलिंदिव्यंततःसंपूजयेच्छिवां ह्रीं श्रीं का
माकर्षिणीचनित्याकलापदांविता अं आं बुद्ध्याकर्षि
णीचतथाहंकाराकर्षिणी इं ईं शब्दाकर्षिणीचतथाउं

स्पर्शाकर्षिणीं ऊं रूपाकर्षिणीं नित्यां ऋं रसाक

र्षिणीं तथा ॠं गंधाकर्षिणीं नित्यां लृं चित्ताक

र्षिणीं तथा लॄं धैर्याकर्षिणीं नित्यां एं स्मृत्याकर्षि

णीं तथा ऐं नामाकर्षिणीं नित्यां ओं बीजाकर्षिणीं

तथा औं आत्माकर्षिणीं नित्यामम्रुताकर्षिणीं तथा

अः शरीराकर्षिणीं च षोडशारे प्रपूजयेत् मूलदेवीम

हादेवि संतर्पयामि नमः सर्वसंक्षोभके चक्रे दला

श्री.	पुष्पांजलिं ततः अनंगकुसुमां देवी मनंगमेखले
११	ति च अनंगमदनां देवी मनंगमदनातुरां संपूज्या
नंगरेखां च संपूज्यानंगवेगिनीं अनंगांकुशां संपूज्य
संपूज्यानंगमालिनीं संपूज्याष्टदले देवि मूल
देवीं च तर्पयेत् शिवशक्त्योः साधकेश्वरः प्रणमेद्यो
निमुद्रया शेषं तच्चक्रत्रितयं ध्यायेद्बिंदुस्वरूपकं
सर्वसौभाग्यप्रदायात्र श्रीचक्राय महेश्वरि दत्वापु

ष्पांजलिं मंत्री पूजयेत्साधकोत्तमः सर्वसंक्षोभिणी
शक्तिः सर्वविद्राविणी तथा श्रीसर्वाकर्षिणी शक्तिः
सर्वाह्लादनकारिणी सर्वसंमोहिनी शक्तिः सर्वस्तं
भनकारिणी श्रीसर्वजृंभणीशक्तिः सर्ववशंकरी
तथा श्रीसर्वरंजनीशक्तिः सर्वोन्मादनरूपिणी स
र्वार्थसाधनीशक्तिः सर्वसंपत्प्रपूरिणी सर्वमंत्र
मयीशक्तिः सर्वद्वंद्वक्षयंकरी संपूज्याः साधकैरेता

श्री. वामावर्त्तेनपार्वति कामेश्वरींचसंतर्प्यप्रणमेद्योनि
१२ मुद्रया सर्वार्थसाधकायाश्चचक्रायसाधकोन्नमः
पुष्पांजलिंततोदद्यात्पूजयेत्साधकोन्नमः सर्वसि
द्धिप्रदांदेवींसर्वसंपत्प्रदांतथा सर्वप्रियंकरींदेवीं
सर्वमंगलकारिणीं सर्वांगसुंदरींदेवींसर्वसौभाग्य
दायिनीं गंधाद्यैःसमभ्यर्च्यतर्पयेत्मूलदेवतां का
मेश्वरींचदेवेशिप्रणमेद्योनिमुद्रया सर्वरत्नाकरा

12

याश्च चक्राधसंस्थवंदिते दत्वाअर्घ्यांजलिं देवि संपूजयेत्
त्सर्वदेवताः ह्रीं श्रीं सर्वज्ञतादेवी सर्वशक्तिस्ततःपरं
सर्वैश्वर्यप्रदादेवी सर्वज्ञानमयीततः ततः संपूजनी
याच सर्वव्याधिविनाशिनी सर्वाधारस्वरूपा च सर्व
पापहराततः सर्वानंदमयीदेवी सर्वेप्सितफलप्रदा
इति गंधाद्यैः पूजयाम्र लदेवीं च तर्पयेत् संतर्प्य स
शिवां देवीं प्रणमेद्योतिभक्तया एतद्द्वितीयचक्रं तु स्म

श्री. र्यंत्ररूपंस्मरेद्धृदि सर्वरोगहराख्यात्रचक्रायनवरूपिणो
१३ दत्वापुष्पांजलिंदेविपूजयेद्देवताष्टकं वशिनीवाग्दे
वताचकामेश्वरीततःपरं मोदिनीवाग्देवताचविम
लाप्यरुणाततः जयिनीवाग्देवताचपूज्यासर्वेश्व
रीशिवे कौलिनीवाग्देवताचपूज्यास्तास्तर्पयाम्यहं
गंधाद्क्षतप्रसूनाद्यैःमूलदेवींचतर्पयेत् वामचक्रे
णसंपूज्यप्रणमेद्योनिमुद्रया वाग्देवताष्टकंपूज्यंर

13

क्रपुष्पैर्विशेषतः ॐअंतरालचक्राय दत्वा पुष्पांज।
लिं ततः दक्षाधोहस्तकमले देव्याः पश्चिमभागके
ज्रंभिणान्कामबाणांश्च वामाधोहस्तभागके मो
हनं कामधनुश्च दक्षिणे देवि तत्करे वशीकारं का
मपाशं कामांकुशं च स्तंभनं चतुर्भुकरपद्मेषु पूजये
तस्त्राप्नुयातिच सर्वसिद्धिप्रदायात्र श्रीचक्राय महे
श्वरि दत्वा पुष्पांजलिं पूजामारभेत्साधकोत्तमः का

श्री. १४

14A

मेश्वरींवज्रेश्वरींपूजयेत्भगमालिनीं कूटत्रयेण
देवेशि त्रिकोणे साधकोत्तमः इति संपूज्य संतर्प्य
मूलेन मूलदेवतां सर्वानंदमयापात्रश्रीचक्राध
सविंदवे दद्यात्पुष्पांजलिं देवि साधकः सर्वसिद्धये
मूलविद्यां समुच्चार्य सप्तवारं महेश्वरि पूजयेत्सा
धको भक्त्या महात्रिपुरसुंदरी इति संपूज्य संतर्प्य
गंधाक्षतप्रसूनकैः धूपदीपादिभिश्चैव नैवेद्यैश्च महत्त

रैः तथाश्रीवटुकायापिदद्याद्बलिमनुत्तमं दत्वादे
व्यैश्चनैर्देविनैवेद्याचमनी—कम् तांबूलचामरच्छ
त्रारात्रिकादीन्निवेदयेत् संक्षोभद्राविणाकृष्टिवशो
न्मादमहांकुशाः खेचरीबीजयोन्यारव्यातवमुद्राः
प्रदर्शयेत् सौभाग्यबीजन्यासेनस्वदेहंव्यापयेच्छि
वे देव्यग्रेचजपंकृत्वापाठंकृत्वाततःपरं वर्मसहस्रं
नाम्नांतुस्तोत्रराजस्यपार्वति शिवशक्त्योर्महादेविज

पंतत्रसमर्पयेत् गुह्यातिगुह्यगोप्त्री त्वंगृहाणास्म
त्कृतंजपं सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि
गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं देवींमंत्र
मयींध्यायेन्मातृकांपीठरूपिणीम् ध्यात्वान्यासंच
रेदेविदेवदेव्यौविसर्जयेत् प्रातःप्रभृतिसायांतंसाया
दिप्रातरंततः यत्कर्मेमिजगद्योनेतदस्तुतवपूजनं
संहारमुद्रयादेविदेवदेव्यौविसृज्यच स्वयंसदाशि

वोभूत्वाशिवशक्तिस्वरूपकः त्रैलोक्येसाधकोदेविस्व

येंचविहरेदिति प्रयोगांश्चैवववक्ष्येहमष्टोपर्वतनंदति

उपचारंब्रवीम्यद्यनचाख्येयंडूरात्मने स्तंभनंमोहनं

चैवमारणाकर्षणेतथा वशीकारंतथोच्चाटंशांतिकं

पौष्टिकंतथा एतेषांसाधनंवक्ष्येजगतांहितकाम्यया

अभक्तायनदातव्यंनदृष्टव्यंकदाचन स्वाधुत्याय

प्रायताङ्गत्वाप्रेतगेहांतिकं मूलंसाधकएवाक्षजपे

श्री॰ दयुतसंख्यया होमोजातीफलैः पीतैः पुष्पैश्चहूत
९६ मिश्रकैः शत्रुसैन्यादिदस्स्तंभवादितांस्तंभनंभवेत्
इतिस्तंभनम् सोमेमध्याह्नसमयेस्नात्वाह्यपजले
16 तत्रकूपांतिकेमंत्रंजप्त्वासाधकोयुतसंख्यया होम
ये — तमिश्रंचमाहिषंदधिशर्करं भस्मनातिलकं
कुर्यात्मोहयेत्सर्व्वतत्रयं इतिमोहनं भौमेर्धरात्रस
मयेचतत्रछायागतः सुधीः अयुतंतज्जपेन्मूलंहोम

येत्घृतशर्करां कर्णिकारसहस्राणिविल्वयुक्तानिपा
र्वति रंभायश्चरसांवापिभवेदाकर्षणंध्रुवं इत्याकर्षणं
गुरौसूर्योदयेगत्वानदीतीरेचसाधकः मूलमंत्रंमहा
देव्याःजपेदयुतसंख्यया होमःसर्पिर्दधिक्षीरमृद्वीका
मालतीयुतैः श्रीफलैःसहस्रादेविवशयेद्भुवनत्रयं
इतिवशीकरणम् शुक्रेनिशायांविगत्वावटमूलेजपे
त्मंत्रं अयुतंसाधकोभक्त्याहोमकार्यस्तुसर्पिषा दधि

नं. २०८

श्री. १८

द्राक्षाविमिश्रेणगोमूत्रेणचपापभैः शत्रोर्मन्त्रदशास्या
पिभवत्युच्चाटनंध्रुवं इत्युच्चाटनं प्रातोप्रभातसमये
कृत्वाकर्माह्निकंसुधीः आगत्यार्चनशाय्यांतुजपेन्मं
त्रायुतंशिवे होमयेत्सर्पिरंभोजसहस्राणिचतुर्दश
ग्रहाणांदेवकोपानां पक्षिणांरक्षसामपि उपद्रवाणांसर्वे
षांभयानांनृपतेस्तथा क्रूराणामपिदुष्टानांमहाशांति
प्रजायते इतिशांतिकम् सर्ववारेषुसर्वत्रजपेन्मंत्रंतथा

१७

नं. २०८

९८

नं. २०८

नं. ९४ ख

पत्र ५८

नं. २०८

त्रिकूटा पं-चांग, ह।

नं. १४८ क२

त्रिकूटा पं-चांग

१८ पत्राणि

तंत्रम्